# स्वच्छभारतं तथा पादपपर्व

## FRESH INDIA AND GREENERY FESTIVAL

"हरीतिम्नः मातृगृहं विद्यापीठम्"

राष्ट्रियसंस्कृतविद्यापीठस्य राष्ट्रियसेवायोजनायाः (N.S.S.) आध्वर्यवे 07-07-2018 तमे दिनाङ्के स्वच्छभारतं तथा पादपपर्व (सस्यारोपणं सस्यपरिरक्षणं च) इत्ययं कार्यक्रमः छात्राणां समधिकोत्साहेन प्रवृत्तः। कार्यक्रमस्यास्य मुख्यातिथित्वेन उपस्थिताः विद्यापीठस्य मान्याः कुलपतयः आचार्य.वि.मुरलीधरशर्ममहाभागाः छात्रान् उद्दिश्य अवदन् यत् "विद्यापीठप्राङ्गणस्य हरितमयत्वसम्पादने छात्राणां श्रमः अविस्मरणीयः। विगतवर्षे पादपपर्वकार्यक्रमस्य अङ्गत्वेन आरोपितानि सस्यानि भृशं प्रवृद्धानि। विद्यापीठस्य प्राङ्गणं दृष्ट्वा तिरुपतिवासिनो जनाः **हरीतिम्नः मातृगृहं विद्यापीठम्** इति प्रशंसाम् अकुर्वन् इति इदमेव निदर्शनमत्र । ये सस्यानि आरोपयन्ति ते भवगवत्सेवकाः भवन्ति" इति। अयं कार्यक्रमः प्रातः ६.३० वादनतः रात्रौ ९.३० वादनपर्यन्तं निरन्तरं प्राचलत् । अस्मिन् कार्यक्रमे विद्यापीठस्य राष्ट्रियसेवायोजनायाः सप्तविभागीयाः द्विशताधिकाः छात्राः अत्यन्तमुत्साहेन भागमगृह्णन् । राष्ट्रियसेवायोजनायाः समायोजकानां डा.यस्.दक्षिणामूर्तिमहाशयानां नेतृत्वे प्रचालिते अस्मिन् कार्यक्रमे अधिकारिणः डा.बलिचक्रवर्तिः, डा.लतामङ्गेश्, डा.भारतभूषणरथः, डा.ए.सुनीता, डा.सच्चिदानन्दमूर्तिः, डा.गिरिकुमारः, रविनायुडु च आसन् ।



सा नो भूमिर्वर्धयद् वर्धमाना । (May this Earth cause us to flourish.)